# वैयाकरणसिद्धान्तकौमुदी

## हलन्तपुंलिङ्गप्रकरणम् (३०)

## ०३.०१.२०१२

# ४२९. त्यदादिषु दृशोऽनालोचने कञ्च (३.२.६०)

- पञ्च पदानि । त्यदादिषु, दृशः, अनालोचने, कञ्, च ।
- 'धातोः' (३.१.९१) इति अधिक्रियते । 'स्पृशोऽनुदके क्विन्' (३.२.५९) इत्यतः 'क्विन्' इति अनुवर्तते ।
- त्यदादिषु उपपदेषु अज्ञानार्थाद् दृशेः धातोः कञ् स्यात्, चात् क्विन् ।

- तद् दृश् (क्विन्) व्
- तद् दृश्

# ४३०. आ सर्वनाम्नः (६.३.९१)

- पदद्वयम् । आ, सर्वनाम्नः ।
- 'दृग्दृशवतुषु' (६.३.८९) इति अनुवर्तते ।
- सर्वनाम्नः आकारः अन्तादेशः स्याद् दृग्दृशवतुषु ।

- तद् दृश्
- त् आ दृश्  ('आ सर्वनाम्नः' इति आत्वम्)
- तादृश्

- कुत्वस्य असिद्धत्वाद् 'व्रश्च..' इति षः, तस्य जश्त्वेन डः । तस्य कुत्वेन गः । तस्य चर्त्वेन पक्षे कः ।

- तादृश् (सुँ) स्
- तादृश् ('हल्ङ्याब्भ्यः...' - ६.१.६८)
- तादृष् ('व्रश्चभ्रस्ज...' - ८.२.३६)
- तादृड् ('झलां जशोऽन्ते' - ८.२.३९)
- तादृग् ('क्विन्प्रत्ययस्य कुः' - ८.२.६२)
- तादृक् ('वाऽवसाने' - ८.४.५६)

- तादृग्/ तादृक् , तादृशौ, तादृशः ।
- ‘षत्वापवादत्वात् कुत्वेन खकारः’ इति कैयटहरदत्तादिमते तु चर्त्वाभावपक्षे ख एव श्रूयते, न तु गः, जश्त्वं प्रति कुत्वस्य असिद्धत्वात् ।
- तादृश् (सुँ) स्
- तादृश् ('हल्ङ्याब्भ्यः...' - ६.१.६८)
- तादृख् ('क्विन्प्रत्ययस्य कुः' - ८.२.६२)
- तादृक् ('वाऽवसाने' - ८.४.५६)
- ‘दिगादिभ्यो यत्’ इति निर्देशात् न असिद्धत्वम् इति वा बोध्यम् ।

- शकारान्तः पुंलिङ्गः ‘विश्’ शब्दः ।
- ’विश प्रवेशने’ - क्विप् ।
- ‘व्रश्च..’ इति षत्वम्, जश्त्वचर्त्वे ।
- विट्/विड्, विशौ, विशः ।
- विशम् ।

- शकारान्तः पुंलिङ्गः ‘नश्’ शब्दः ।
- ‘णश अदर्शने’ - क्विप् ।

# ४३१. नशेर्वा (८.२.६३)

- पदद्वयम् । नशेः, वा ।
- 'पदस्य' (८.१.१६) इति अधिक्रियते । 'स्कोः संयोगाद्योरन्ते च' (८.२.२९) इत्यतः 'अन्ते' इति, 'क्विन्प्रत्ययस्य कुः' (८.२.६२) इत्यतः 'कुः' इति अनुवर्तते ।
- नशेः कवर्गः अन्तादेशः वा स्यात् पदान्ते ।
- नक्/नग्/नट्/नड्, नशौ, नशः ।
- नग्भ्याम्/नड्भ्याम् ।

# ४३२. स्पृशोऽनुदके क्विन् (३.२.५८)

- पदत्रयम् । स्पृशः, अनुदके, क्विन् ।
- 'सुपि स्थः' (३.२.४) इत्यतः 'सुपि' इति अनुवर्तते ।
- अनुदके सुपि उपपदे स्पृशेः क्विन् स्यात् ।

- घृतस्पृक्/घृतस्पृग्, घृतस्पृशौ, घृतस्पृशः ।
- क्विन् प्रत्ययः यस्माद् इति बहुव्रीह्याश्रयणात् क्विपि अपि कुत्वम् ।
- स्पृक् ।
- षडगकाः प्राग्वत् ।

- ‘ञिधृषा प्रागल्भ्ये’ ।
- अस्मात् ’ऋत्विग्-दधृक्-स्रग्-...’ इति क्विन् ।
- द्वित्वम् अन्तोदात्तत्वं च निपात्यते ।
- कुत्वात् पूर्वं जश्त्वेन ड:, ग:, क: ।
- धृष्णोतीति दधृक्/दधृग्, दधृषौ, दधृष: ।
- दधृग्भ्याम् इत्यादि ।

- रत्नानि मुष्णाति इति रत्नमुट्/रत्नमुड्, रत्नमुषौ, रत्नमुषः ।

- षकारान्तः पुंलिङ्गः 'षष्' शब्दः ।
- 'षड्भ्यो लुक्' - षट्संज्ञकेभ्यः परयोः जश्शसोः लुक् स्यात् ।
- षट्/षड् ।
- षड्भिः । षड्भ्यः ।

- ‘षट्चतुर्भ्यश्च’ इति नुट् ।
- ‘अनाम्’ इति पर्युदासात् न ष्टुत्वनिषेधः ।
- ‘न पदान्ताट्टोरनाम्’ इति ष्टुत्वनिषेधः अत्र न भवतीत्यर्थः ।
- ‘यरोऽनुनासिकेऽनुनासिको वा’ इति विकल्पं बाधित्वा ‘प्रत्यये भाषायां नित्यम्’ इति वचनात् नित्यम् अनुनासिकः ।

- षष् आम्
- षष् न् आम् ('षट्चतुर्भ्यश्च' - ७.१.५५ - इति नुट्)
- षड् नाम् ('झलां जशोऽन्ते' - ८.२.३९)
- षड् णाम् ('ष्टुना ष्टुः' - ८.४.४१)
- षण्णाम् । ('प्रत्यये भाषायां नित्यम्')

- षट्त्सु/षट्सु ।
- जश्त्वे कृते 'डः सि धुट्' इति वा धुडागमः ।

- तदन्तविधिः ।
- परमषट् ।
- परमषण्णाम् ।
- जश्शसोः लुक्, नुडागमश्च प्रवर्तेते ।

- गौणत्वे तु प्रियषषः ।
- प्रियषषाम् ।

- षकारान्तः पुंलिङ्गः ‘पिपठिष्’ शब्दः ।
- ‘पठ व्यक्तायां वाचि’
- पठितुम् इच्छति इति विग्रहे
- पठ्  स(न्)  (‘धातोः कर्मणः...’ - ३.१.७ - इति सन् प्रत्ययः)
- पठ् पठ् स  (‘सन्यङोः’ - ६.१.९ - इति द्वित्वम्)
- प पठ्  स   (‘हलादिः शेषः’ - ७.४.६० - इति ठकारलोपः)
- पिपठ्  स   (‘सन्यतः’ -  ७.४.७९ - इति अकारस्य इकारः)
- पिपठ् इ स  (‘आर्धधातुकस्येड् वलादेः’ - ७.२.३५ - इति इडागमः)
- पिपठिष       (‘आदेशप्रत्यययोः’ - ८.३.५९ - इति षत्वम्)

- पिपठिष (‘सनाद्यन्ता धातवः’ - ३.१.३२ - इति धातुत्वम्)
- पिपठिष  (क्विप्) व्  (‘अन्येभ्योऽपि दृश्यते’ - ३.२.१७८ - इति क्विप्)
- पिपठिष्   व् (‘अतो लोपः’ - ३.४.४८ - इति अकारलोपः)
- पिपठिष्      (‘वेरपृक्तस्य’ - ६.१.६७ - इति वलोपः)
- पिपठिष्      (‘कृत्तद्धितसमासाश्च’ - १.२.४६ - इति प्रातिपदिकत्वम्)

- रुत्वं प्रति षत्वस्य असिद्धत्वात् ‘ससजुषो रुः’ इति रुत्वम् ।
- पिपठिष्   स्
- पिपठिष्       (‘हल्ङ्याब्भ्यः...’ - ६.१.६८)
- पिपठिर्       (‘ससजुषो रुः’ - ८.२.६६)

# ४३३. वोॅरुपधाया दीर्घ इकः (८.२.७६)

- चत्वारि पदानि । वोॅः, उपधायाः, दीर्घः, इकः ।
- ‘पदस्य’ (८.१.१६) इति अधिक्रियते । ‘स्कोः संयोगाद्योरन्ते च’ (८.२.२९) इत्यतः ‘अन्ते’ इति अनुवर्तते । ‘सिपि धातो रुर्वा’ (८.२.७४) इत्यतः ‘धातोः’ इति अनुवर्तते ।
- रेफवान्तस्य धातोः उपधायाः इकः दीर्घः स्यात् पदान्ते ।

- पिपठीर् (‘वोॅरुपधाया दीर्घ इकः’ इति इकारस्य दीर्घः)
- पिपठीः (‘खरवसानयोर्विसर्जनीयः’ - ८.३.१५)

- पिपठिषौ, पिपठिषः ।
- पिपठीभ्र्याम् ।
- पिपठिष् सु
- पिपठिर् सु ('ससजुषो रुः' - ८.२.६६)
- पिपठीर् सु ('र्वोरुपधाया दीर्घ इकः' - ८.२.७६)
- पिपठीः सु ('खरवसानयोर्विसर्जनीयः' - ८.३.१५)
- पिपठीः सु ('वा शरि' - ८.३.३६)
- विसर्गाभावे,
- पिपठीस् सु ('विसर्जनीयस्य सः' - ८.३.३४)

# ४३४. नुम्विसर्जनीयशर्व्यवायेऽपि (८.३.५८)

- पदद्वयम् । नुम्-विसर्जनीय-शर्-व्यवाये, अपि ।
- 'अपदान्तस्य मूर्धन्यः' (८.३.५५) इति अधिक्रियते । 'सहेः साडः सः' (८.३.५६) इत्यतः 'सः' इति, 'इण्कोः' (८.३.५७) इति च अनुवर्तते ।
- एतैः प्रत्येकं व्यवधानेऽपि इण्कुभ्यां परस्य सस्य मूर्धन्यादेशः स्यात् ।

- पिपठीः सु
- विसर्जनीयव्यवाये षत्वम् ।
- पिपठीःषु ।

- पिपठीस् सु
- शर्व्यवाये षत्वम् ।
- पिपठीस्  षु  (‘नुम्विसर्जनीय..’ - ८.३.५८)
- ष्टुत्वेन पूर्वस्य षत्वम् ।
- पिपठीष्षु   (‘ष्टुना ष्टुः’ - ८.४.४१)

- ‘प्रत्येकम्’ इति व्याख्यानाद् अनेकव्यवधाने षत्वं न ।
- निंस्स्व । निंस्से ।

- नुम्ग्रहणं नुम्-स्थानिकानुस्वारोपलक्षणार्थं व्याख्यानात् ।
- तेनेह न - सुहिन्सु ।
- नुमः नकारेण व्यवधाने षत्वं न ।
- पुंसु ।
- केवलेन अनुस्वारेण व्यवधाने षत्वं न ।
- अत एव न शर्ग्रहणेन गतार्थता ।